# उपनिषत्सु स्नातकोत्सवः

आचार्यस्य आश्रमे अध्ययनं परिसमाप्य प्रायशो विद्यार्थिनः स्वगृहमागच्छन् । आश्रमात् गृहागमनं समावर्तनम् । अस्मिन्नवसरे समावर्तनसंस्कारः सम्पादितः । समावर्तनसंस्कारे विद्यासम्पन्नस्य ब्रह्मचारिणोः विधिवत्स्नानमभूत् इदं परिलक्ष्य वर्तनस्यापरनाम स्नानमेव । समावर्तन सम्बन्धि स्नानमिदं कृत्वैव स स्नातकोऽभवत् । पाणिनिस्तु स्नातकस्यापरपर्यायं स्रग्वीति निर्दिशति । इदं नाम तस्य मालाधारणमुद्दिश्य कृतम् । ब्रह्मचर्यकाले विद्यार्थी सर्वथा भोगविलासादिभ्यो विरक्तोऽभवत् । समावर्तनकालो स शरीरस्य प्रसाधनं कृतवान्।

स्नातकस्य वेशविन्यासः गृहस्थामिवाऽभवत् । वैदिकयुगादारभ्य प्रायः सदैव स्नातकः समाजस्य सर्वोच्च पुरुषोऽगण्यत । अथर्ववेदानुसारं स स्नातो बभ्रूः पृथिव्यां बहु रोचते । समावर्तनकाले स्नातका आचार्यं प्रति कृतज्ञताभावं न्यवेदयन् ते तमभिनन्दितवन्तः त्वं हि नः पिता योऽस्माकमविद्यायाः परम्पपारं तारयसीति (प्र.उ.6.8) आचार्याः अपि जीवनोपयोगिसनातनशिक्षामदुः।

**सत्यं वद, धर्मं चर । स्वाध्यायान्माप्रमदः आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमादितव्यम् । कुशलान्न प्रमदिव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचाभ्यां मा प्रमदितव्यम् । देवपितृ कार्याभ्यां न प्रमदितव्यम् । मातृ देवो भव । पितृ देवो भव । आचार्यदेवो भव । अतिथि देवो भव । यान्यवद्यानि कर्माणि, तानि सेवितव्यानि, नो इतराणि । यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इताराणि । (तै.उ.शि.व.11)**

बृहदारण्यकोपनिषदि द अक्षरेण स्नातकाः उपनिष्टाः – दाम्यत दानं दयध्वं चेति । (बृ.उ.5.2)

**ब्रह्मणस्य सदा देयं ब्रह्मशुश्रूषवे तथा । भवन्तो बहुलाः सन्तु वेदो विस्तार्यतामयम् ।।**

**नापरीक्षितचारित्रे विद्या देया कथाञ्चन । न नियोज्याश्च वा शिष्टा अनियोगे महाभये ।।**

**यथामति यथा पाठं तथा विद्या फलिष्यति । सर्वस्तरतु दुर्गाणि सर्गे भद्राणि पश्यति ।।**